# Kanakadhara Stotra

# કનકધારાસ્તોત્રમ્

## Document Information

Text title : Kanakadhara Stotra

File name : kanaka.itx

Category : devii, lakShmI, stotra, devI, shankarAchArya

Location : doc_devii

Transliterated by : P. P. Narayanaswami swami at math.mun.ca

Proofread by : P. P. Narayanaswami swami at math.mun.ca, Kirk Wortman

Description-comments : Hymn to Goddess Laxmi, to confer prosperity on a poor woman

Latest update : November 1, 2010, June 5, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2022

*sanskritdocuments.org*

# કનકધારાસ્તોત્રમ્

વન્દે વન્દારુમન્દારમિન્દિરાનન્દકન્દલમ્ ।
અમન્દાનન્દસન્દોહબન્ધુરં સિન્ધુરાનનમ્ ॥

અઙ્ગં હરેઃ પુલકભૂષણમાશ્રયન્તી
    ભૃઙ્ગાઙ્ગનેવ મુકુલાભરણં તમાલમ્ ।
અઙ્ગીકૃતાખિલવિભૂતિરપાઙ્ગલીલા
    માઙ્ગલ્યદાસ્તુ મમ મઙ્ગળદેવતાયાઃ ॥ ૧॥

મુગ્ધા મુહુર્વિદધતી વદને મુરારેઃ
    પ્રેમત્રપાપ્રણિહિતાનિ ગતાગતાનિ ।
માલા દૃશોર્મધુકરીવ મહોત્પલે યા
    સા મે શ્રિયં દિશતુ સાગરસમ્ભવાયાઃ ॥ ૨॥

આમીલિતાક્ષમધિગમ્ય મુદા મુકુન્દં
    આનન્દકન્દમનિમેષમનઙ્ગતન્ત્રમ્ ।
આકેકરસ્થિતકનીનિકપક્ષ્મનેત્રં
    ભૂત્યૈ ભવેન્મમ ભુજઙ્ગશયાઙ્ગનાયાઃ ॥ ૩॥

બાહ્વન્તરે મધુજિતઃ શ્રિતકૌસ્તુભે યા
    હારાવલીવ હરિનીલમયી વિભાતિ ।
કામપ્રદા ભગવતોઽપિ કટાક્ષમાલા
    કલ્યાણમાવહતુ મે કમલાલયાયાઃ ॥ ૪॥

કાલામ્બુદાળિલલિતોરસિ કૈટભારેઃ
    ધારાધરે સ્ફુરતિ યા તડિદઙ્ગનેવ ।
માતુસ્સમસ્તજગતાં મહનીયમૂર્તિઃ
    ભદ્રાણિ મે દિશતુ ભાર્ગવનન્દનાયાઃ ॥ ૫॥

પ્રાપ્તં પદં પ્રથમતઃ ખલુ યત્પ્રભાવાન્-

માઙ્ગલ્યભાજિ મધુમાથિનિ મન્મથેન ।
મય્યાપતેત્તદિહ મન્થરમીક્ષણાર્ધં
મન્દાલસં ચ મકરાલયકન્યકાયાઃ ॥ ૬॥

વિશ્વામરેન્દ્રપદવિભ્રમદાનદક્ષં
આનન્દહેતુરધિકં મુરવિદ્વિષોઽપિ ।
ઈષન્નિષીદતુ મયિ ક્ષણમીક્ષણાર્ધ-
મિન્દીવરોદરસહોદરમિન્દિરાયાઃ ॥ ૭॥

ઇષ્ટા વિશિષ્ટમતયોઽપિ યયા દયાર્દ્ર
દૃષ્ટ્યા ત્રિવિષ્ટપપદં સુલભં લભન્તે ।
દૃષ્ટિઃ પ્રહૃષ્ટકમલોદરદીપ્તિરિષ્ટાં
પુષ્ટિં કૃષીષ્ટ મમ પુષ્કરવિષ્ટરાયાઃ ॥ ૮॥

દદ્યાદ્દયાનુપવનો દ્રવિણામ્બુધારાં
અસ્મિન્નકિઞ્ચનવિહઙ્ગશિશૌ વિષણ્ણે ।
દુષ્કર્મઘર્મમપનીય ચિરાય દૂરં
નારાયણપ્રણયિનીનયનામ્બુવાહઃ ॥ ૯॥

ધીર્દેવતેતિ ગરુડધ્વજસુન્દરીતિ var ગરુડધ્વજભામિનીતિ
શાકમ્ભરીતિ શશિશેખરવલ્લભેતિ ।
સૃષ્ટિસ્થિતિપ્રલયકેલિષુ સંસ્થિતાયૈ
તસ્યૈ નમસ્ત્રિભુવનૈકગુરોસ્તરુણ્યૈ ॥ ૧૦॥

શ્રુત્યૈ નમોઽસ્તુ શુભકર્મફલપ્રસૂત્યૈ
રત્યૈ નમોઽસ્તુ રમણીયગુણાર્ણવાયૈ ।
શક્ત્યૈ નમોઽસ્તુ શતપત્રનિકેતનાયૈ
પુષ્ટ્યૈ નમોઽસ્તુ પુરુષોત્તમવલ્લભાયૈ ॥ ૧૧॥

નમોઽસ્તુ નાલીકનિભાનનાયૈ
નમોઽસ્તુ દુગ્ધોદધિજન્મભૂમ્યૈ ।
નમોઽસ્તુ સોમામૃતસોદરાયૈ
નમોઽસ્તુ નારાયણવલ્લભાયૈ ॥ ૧૨॥

નમોઽસ્તુ હેમામ્બુજપીઠિકાયૈ
નમોઽસ્તુ ભૂમણ્ડલનાયિકાયૈ ।
નમોઽસ્તુ દેવાદિદયાપરાયૈ

નમોઽસ્તુ શાર્ઙ્ગાયુધવલ્લભાયૈ ॥ ૧૩॥

નમોઽસ્તુ દેવ્યૈ ભૃગુનન્દનાયૈ
નમોઽસ્તુ વિષ્ણોરુરસિ સ્થિતાયૈ ।
નમોઽસ્તુ લક્ષ્મ્યૈ કમલાલયાયૈ
નમોઽસ્તુ દામોદરવલ્લભાયૈ ॥ ૧૪॥

નમોઽસ્તુ કાન્ત્યૈ કમલેક્ષણાયૈ
નમોઽસ્તુ ભૂત્યૈ ભુવનપ્રસૂત્યૈ ।
નમોઽસ્તુ દેવાદિભિરર્ચિતાયૈ
નમોઽસ્તુ નન્દાત્મજવલ્લભાયૈ ॥ ૧૫॥

સમ્પત્કરાણિ સકલેન્દ્રિયનન્દનાનિ
સામ્રાજ્યદાનવિભવાનિ સરોરુહાક્ષિ । var સરોરુહાણિ
ત્વદ્વન્દનાનિ દુરિતોત્તરણોદ્યતાનિ var દુરિતાહરણોદ્યતાનિ
મામેવ માતરનિશં કલયન્તુ માન્યે ॥ ૧૬॥

યત્કટાક્ષસમુપાસનાવિધિઃ
સેવકસ્ય સકલાર્થસમ્પદઃ ।
સન્તનોતિ વચનાઙ્ગમાનસૈઃ
ત્વાં મુરારિહૃદયેશ્વરીં ભજે ॥ ૧૭॥

સરસિજનિલયે સરોજહસ્તે
ધવળતમાંશુકગન્ધમાલ્યશોભે ।
ભગવતિ હરિવલ્લભે મનોજ્ઞે
ત્રિભુવનભૂતિકરિ પ્રસીદ મહ્યમ્ ॥ ૧૮॥

દિગ્ઘસ્તિભિઃ કનકકુમ્ભમુખાવસૃષ્ટ
સ્વર્વાહિની વિમલચારુજલપ્લુતાઙ્ગીમ્ ।
પ્રાતર્નમામિ જગતાં જનનીમશેષ
લોકાધિનાથગૃહિણીમમૃતાબ્ધિપુત્રીમ્ ॥ ૧૯॥

કમલે કમલાક્ષવલ્લભે ત્વં
કરુણાપૂરતરઙ્ગિતૈરપાઙ્ગૈઃ ।
અવલોકય મામકિઞ્ચનાનાં
પ્રથમં પાત્રમકૃત્રિમં દયાયાઃ ॥ ૨૦॥

દેવિ પ્રસીદ જગદીશ્વરિ લોકમાતઃ
    કલ્યાનગાત્રિ કમલેક્ષણજીવનાથે ।
દારિદ્ર્યભીતિહૃદયં શરણાગતં માં
    આલોકય પ્રતિદિનં સદયૈરપાઙ્ગૈઃ ॥ ૨૧॥

સ્તુવન્તિ યે સ્તુતિભિરમૂભિરન્વહં
    ત્રયીમયીં ત્રિભુવનમાતરં રમામ્ ।
ગુણાધિકા ગુરુતરભાગ્યભાગિનો
    ભવન્તિ તે ભુવિ બુધભાવિતાશયાઃ ॥ ૨૨॥

॥ ઇતિ શ્રીમદ્ શઙ્કરાચાર્યકૃત
શ્રી કનકધારાસ્તોત્રં સમ્પૂર્ણમ્ ॥

અયં સ્તવઃ સ્વામિના શઙ્કરભગવત્પાદેન બ્રહ્મવ્રતસ્થેન કાલટિનામ્નિ સ્વગ્રામ એવાકિઞ્ચન્યપરિખિન્નાયા દ્વિજગૃહિણ્યા નિર્ધનત્વમાર્જનાય નિરમાયિ । તેન સ્તવેન પ્રીતા લક્ષ્મીર્વિપ્રં વિપુલધનદાનેનાપ્રીણયદિતિ શઙ્કરવિજયતઃ સમાધિગમ્યતે, “સ મુનિર્મુરજિત્કુટુમ્બિનીં પદચિત્રૈર્નવનીત કોમલૈઃ ંઅધુરૈરૂપતસ્થિવાં- સ્તવૈઃ” ઇત્યાદિના ॥ એતે શ્રીમન્માતુરભ્યર્થનયા સ્તવમેતમતનિષતેતિ કાલટિગ્રામનિકટવર્તિનાં વિદુષાં મતમ્ । તદારભ્ય કર્ણાકર્ણિકયા તથાનુશ્રુતમ્ ।

Verse 16 through 21 above are not found in some of the printed texts.

Encoded by P . P . Narayanaswami at swami at math.mun.ca
Proofread by P . P . Narayanaswami, Kirk Wortman

*Kanakadhara Stotra*

pdf was typeset on June 5, 2022

Please send corrections to *sanskrit@cheerful.com*